শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে দ্বিসপ্ততিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে দ্বিসপ্ততিতমং দশকম্ ॥

## অক্রূরাগমনৱর্ণনম্

কংসোঽথ নারদগিরা ব্রজৱাসিনং ৎৱা -
মাকর্ণ্য দীর্ণহৃদযঃ স হি গান্দিনেযম্।
আহূয কার্মুকমখচ্ছলতো ভৱন্ত -
মানেতুমেনমহিনোদহিনাথশাযিন্॥ **72.1** ॥

অক্রূর এষ ভৱদঙ্ঘ্রিপরশ্চিরায
ৎৱদ্দর্শনাক্ষমমনাঃ ক্ষিতিপালভীত্যা।
তস্যাজ্ঞযৈৱ পুনরীক্ষিতুমুদ্যতস্ত্বা -
মানন্দভারমতিভূরিতরং বভার॥ **72.2** ॥

সোঽযং রথেন সুকৃতী ভৱতো নিৱাসং
গচ্ছন্ মনোরথগণাংস্ত্বযি ধার্যমাণান্।
আস্বাদযন্ মুহুরপাযভযেন দৈৱং
সম্প্রার্থযন্ পথি ন কিঞ্চিদপি ৱ্যজানাৎ॥ **72.3** ॥

দ্রক্ষ্যামি ৱেদশতগীতগতিং পুমাংসং
স্প্রক্ষ্যামি কিংস্বিদপি নাম পরিষ্ৱজেযম্।
কিং ৱক্ষ্যতে স খলু মাং ক্বনু ৱীক্ষিতঃ স্যা -
দিত্থং নিনায স ভৱন্ময়মেৱ মার্গম্॥ **72.4** ॥

ভূযঃ ক্রমাদভিৱিশন্ ভৱদঙ্ঘ্রিপূতং
ৱৃন্দাৱনং হরৱিরিঞ্চসুরাভিৱন্দ্যম্।

আনন্দমগ্ন ইৱ লগ্ন ইৱ প্রমোহে
কিং কিং দশান্তরমৱাপ ন পঙ্কজাক্ষ ॥ **72.5** ॥

পশ্যন্নৱন্দত ভৱদ্বিহৃতিস্থলানি
পাংসুষ্ৱৱেষ্টত ভৱচ্চরণাঙ্কিতেষু।
কিং ব্রূমহে বহুজনা হি তদাপি জাতা
এৱং তু ভক্তিতরলা ৱিরলাঃ পরাত্মন্ ॥ **72.6** ॥

সাযং স গোপভৱনানি ভৱচ্চরিত্র -
গীতামৃতপ্রসৃতকর্ণরসাযনানি।
পশ্যন্ প্রমোদসরিতেৱ কিলোহ্যমানো
গচ্ছন্ ভৱদ্ভৱনসন্নিধিমন্ৱযাসীৎ ॥ **72.7** ॥

তাৱদ্দদর্শ পশুদোহৱিলোকলোলং
ভক্তোত্তমাগতিমিৱ প্রতিপালযন্তম্।
ভূমন্ ভৱন্তমযমগ্রজৱন্তমন্ত -
র্ব্রহ্মানুভূতিরসসিন্ধুমিৱোদ্ৱমন্তম্ ॥ **72.8** ॥

সাযন্তনাপ্লৱৱিশেষৱিৱিক্তগাত্রৌ
দ্বৌ পীতনীলরুচিরাম্বরলোভনীযৌ।
নাতিপ্রপঞ্চধৃতভূষণচারুৱেষৌ
মন্দস্মিতার্দ্রৱদনৌ স যুৱাং দদর্শ ॥ **72.9** ॥

দূরাদ্রথাৎসমৱরুহ্য নমন্তমেন -
মুত্থাপ্য ভক্তকুলমৌলিমথোপগূহন্।
হর্ষান্মিতাক্ষরগিরা কুশলানুযোগী
পাণিং প্রগৃহ্য সবলোঽথ গৃহং নিনেথ ॥ **72.10** ॥

নন্দেন সাকমমিতাদরমর্চযিৎৱা
তং যাদৱং তদুদিতাং নিশময্য ৱার্তাম্।

গোপেষু ভূপতিনিদেশকথাং নিৱেদ্য
    নানাকথাভিরিহ তেন নিশামনৈষীঃ ॥ **72.11** ॥

চন্দ্রাগৃহে কিমুত চন্দ্রভগাগৃহে নু
    রাধাগৃহে নু ভৱনে কিমু মৈত্রৱিন্দে।
ধূর্তো ৱিলম্বত ইতি প্রমদাভিরুচ্চৈ -
    রাশঙ্কিতো নিশি মরুৎপুরনাথ পাযাঃ ॥ **72.12** ॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বিসপ্ততিতমং দশকং সমাপ্তম্ ॥